ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# पञ्चमकाण्डे षष्ठः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **May 31, 2021**

## Version Notes:

**This is now the current Version 1.0 dated May 31, 2021.**

1. This replaces the earlier version 0.1 dated May 31, 2020.

2. This version has been updated with the errors found and reported till May 31, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st August 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th September 2019 |
| 4th | Version Number | 0.1 dated 31st May 2020 |

# Table of Contents


## 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं 4

5.6 पञ्चमकाण्डे षष्ठः प्रश्नः – उपानुवाक्याभिधानं........ 4

**ओं नमः परमात्मने, श्री महागणपतये नमः,**

**श्री गुरुभ्यो नमः , हरिः ओं**

# 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं

## 5.6 पञ्चमकाण्डे षष्ठः प्रश्नः – उपानुवाक्याभिधानं

**TS 5.6.1.1**

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं ँ या गर्भं दधिरे विरूपास्ता न आपः श७ स्योना भवन्तु ॥
यासा७ं राजा वरुणो याति मद्ध्ये सत्यानृते अवपश्यन् जनानां ।
मधुश्चुतः शुचयो याः पावकास्ता न आपः श७ स्योना भवन्तु ॥
यासां देवा दिवि कृण्वन्ति भक्षं ँ या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति – [ ] **1**

## TS 5.6.1.1 - Padam

हिरण्यवर्णा इति हिरण्य – वर्णाः । शुचयः । पावकाः । यासु । जातः । कश्यपः । यासु । इन्द्रः ॥ अग्निम् । याः । गर्भम् । दधिरे । विरूपा इति वि – रूपाः । ताः । नः । आपः । शम् । स्योनाः । भवन्तु ॥ यासाम् । राजा । वरुणः । याति । मद्ध्ये । सत्यानृते इति सत्य – अनृते । अवपश्यन्नित्यव – पश्यन्न् । जनानाम् ॥ मधुश्चुत इति मधु – श्चुतः । शुचयः । याः । पावकाः । ताः । नः । आपः । शम् । स्योनाः । भवन्तु ॥ यासाम् । देवाः । दिवि । कृण्वन्ति । भक्षम् । याः । अन्तरिक्षे । बहुधेति बहु – धा । भवन्ति ॥ याः । पृथिवीम् । पयसा । उन्दन्ति । **1 (50)**

## TS 5.6.1.2

शुक्रास्ता न आपः शꣳ स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यताऽऽपः शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाꣳ अग्नीꣳरफ्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥
यददः संप्रयती–रहावनदता हते ।

तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥

यत् प्रेषिता वरुणेन ताः शीभ॰ं समवल्गत । 2

**TS 5.6.1.2 - Padam**

शुक्राः । ताः । नः । आपः । शम् । स्योनाः । भवन्तु ॥ शिवेन ।

मा । चक्षुषा । पश्यत । आपः । शिवया । तनुवा । उपेति ।

स्पृशत । त्वचम् । मे ॥ सर्वान् । अग्नीन् । अफ्सुषद

इत्यफ्सु – सदः । हुवे । वः । मयि । वर्चः । बलम् । ओजः ।

नीति । धत्त ॥ यत् । अदः । संप्रयतीरिति सं – प्रयतीः । अहौ ।

अनदत । हते ॥ तस्मात् । एति । नद्यः । नाम । स्थ । ता । वः ।

नामानि । सिन्धवः ॥ यत् । प्रेषिता इति प्र – इषिताः । वरुणेन ।

ताः । शीभम् । समवल्गतेति सं – अवल्गत ॥ 2 (50)

**TS 5.6.1.3**

तदाप्नो–दिन्द्रो वो यती–स्तस्मा–दापो अनु स्थन ॥

अपकाम॰ं स्यन्दमाना अवीवरत वो हिकं ।

इन्द्रो वः शक्तिभि र्देवी–स्तस्माद्–वार्णाम वो हितं ॥

एको देवो अप्यतिष्ठथ् स्यन्दमाना यथा वशं ।

उदानिषु–र्महीरिति तस्मा–दुदक–मुच्यते ॥

आपो भद्रा घृतमिदाप आसु–रग्नीषोमौ बिभ्रत्याप इत् ताः ।

तीव्रो रसो मधुपृचा – [ ] **3**

**TS 5.6.1.3 - Padam**

तत् । आप्नोत् । इन्द्रः । वः । यतीः । तस्मात् । आपः । अन्विति ।

स्थन ॥ अपकाममित्यप – कामम् । स्यन्दमानाः । अवीवरत । वः ।

हिकम् ॥ इन्द्रः । वः । शक्तिभिरिति शक्ति–भिः । देवीः । तस्मात् ।

वाः । नाम । वः । हितम् ॥ एकः । देवः । अपीति । अतिष्ठत् ।

स्यन्दमानाः । यथावशमिति यथा – वशम् ॥ उदिति । आनिषुः ।

महीः । इति । तस्मात् । उदकम् । उच्यते ॥ आपः । भद्राः ।

घृतम् । इत् । आपः । आसुः । अग्नीषोमावित्यग्नी – सोमौ ।

बिभ्रति । आपः । इत् । ताः ॥ तीव्रः । रसः ।

मधुपृचामिति मधु–पृचाम् । **3 (50)**

**TS 5.6.1.4**

–मरंगम आ मा प्राणेन सह वर्चसा गन्न् ॥

आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ् न आसां ।

मन्ये भेजानो अमृतस्य तर्.हि हिरण्यवर्णा अतृपं ँयदा वः ॥

आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः ( ) ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।

आपो **जनयथा** च नः ॥

दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या सं भव ब्रह्मवर्चस–मसि

ब्रह्मवर्चसाय त्वा ॥ 4

**TS 5.6.1.4 - Padam**

अरङ्गम इत्यरं – गमः । एति । मा । प्राणेनेति प्र – अनेन । सह ।

वर्चसा । गन्न् ॥ आत् । इत् । पश्यामि । उत । वा । शृणोमि ।

एति । मा । घोषः । गच्छति । वाक् । नः । आसाम् ॥ मन्ये ।
भेजानः । अमृतस्य । तर्.हि । हिरण्यवर्णा इति हिरण्य – वर्णाः ।
अतृपम् । यदा । वः ॥ आपः । हि । स्थ ।
मयोभुव इति मयः – भुवः । ताः । नः । ऊर्जे । दधातन ॥ महे ।
रणाय । चक्षसे ॥ यः । वः । शिवतम इति शिव – तमः । रसः ।
तस्य । भाजयत । इह । नः ॥ उशतीः । इव । मातरः ( ) ॥ तस्मै ।
अरम् । गमाम । वः । यस्य । क्षयाय । जिन्वथ ॥ आपः । जनयथ ।
च । नः ॥ दिवि । श्रयस्व । अन्तरिक्षे । यतस्व । पृथिव्या ।
समिति । भव । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । असि ।
ब्रह्मवर्चसायेति ब्रह्म – वर्चसाय । त्वा ॥ **4 (72)** *(उदन्ति – समवल्गात – मधुपृचां – मातरो – द्वाविꣳशतिश्च) (A1)*

**TS 5.6.2.1**

अपां ग्रहान् गृह्णात्येतद्–वाव राजसूयं ँयदेते ग्रहाः सवो
ऽग्निर्वरुणसवो राजसूय–मग्निसव–श्चित्य स्ताभ्या–मेव सूयतेऽथो

उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाऽग्निचित

आपो भवन्त्यापो वा अग्नेर्भ्रातृव्या यदपो ऽग्ने–रधस्तादुप दधाति

भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यमृतं – [ ] **5**

**TS 5.6.2.1 - Padam**

अपाम् । ग्रहान् । गृह्णाति । एतत् । वाव । राजसूयमिति

राज – सूयम् । यत् । एते । ग्रहाः । सवः । अग्निः । वरुणसव इति

वरुण – सवः । राजसूयमिति राज – सूयम् । अग्निसव

इत्यग्नि – सवः । चित्यः । ताभ्याम् । एव । सूयते । अथो इति ।

उभौ । एव । लोकौ । अभीति । जयति । यः । च । राजसूयेनेति

राज – सूयेन । ईजानस्य । यः । च । अग्निचित इत्यग्नि–चितः ।

आपः । भवन्ति । आपः । वै । अग्नेः । भ्रातृव्याः । यत् । अपः ।

अग्नेः । अधस्तात् । उपदधातीत्युप – दधाति । भ्रातृव्याभिभूत्या

इति भ्रातृव्य – अभिभूत्यै । भवति । आत्मना । परेति । अस्य ।

भ्रातृव्यः । भवति । अमृतम् । **5 (50)**

**TS 5.6.2.2**

वा आपस्तस्मा–दद्भिरवतान्त–मभि षिञ्चन्ति नाऽऽर्तिमार्च्छति

सर्वमायुरेति यस्यैता उपधीयन्ते य उ चैना एवं वेदान्नं वा आपः

पशव आपो ऽन्नं पशवो ऽन्नादः पशुमान् भवति यस्यैता उपधीयन्ते

य उ चैना एवं वेद द्वादश भवन्ति द्वादश मासाः संवथ्सरः

संवथ्सरेणैवास्मा– [ ] 6

**TS 5.6.2.2 - Padam**

वै । आपः । तस्मात् । अद्भिरित्यत्–भिः । अवतान्तमित्यव–तान्तम् ।

अभीति । सिञ्चन्ति । न । आर्तिम् । एति । ऋच्छति । सर्वम् ।

आयुः । एति । यस्य । एताः । उपधीयन्त इत्युप – धीयन्ते । यः ।

उ । च । एनाः । एवम् । वेद । अन्नम् । वै । आपः । पशवः ।

आपः । अन्नम् । पशवः । अन्नाद इत्यन्न – अदः । पशुमानिति

पशु – मान् । भवति । यस्य । एताः । उपधीयन्त इत्युप–धीयन्ते ।

यः । उ । च । एनाः । एवम् । वेद । द्वादश । भवन्ति । द्वादश ।

मासाः । सँवथ्सर इति सं – वथ्सरः ।

सँवथ्सरेणेति सं – वथ्सरेण । एव । अस्मै । **6 (50)**

**TS 5.6.2.3**

अन्नमव रुन्धे पात्राणि भवन्ति पात्रे वा अन्नमद्यते सयोन्येवान्नमव

रुन्ध आ द्वादशात् पुरुषादन्न–मत्त्यथो पात्रान्न छिद्यते यस्यैता

उपधीयन्ते य उ चैना एवं वेँद कुंभाश्च कुंभीश्च मिथुनानि भवन्ति

मिथुनस्य प्रजात्यै प्र प्रजया पशुभि–र्मिथुनै–र्जायते यस्यैता

उपधीयन्ते य उ– [ ] **7**

**TS 5.6.2.3 - Padam**

अन्नम् । अवेति । रुन्धे । पात्राणि । भवन्ति । पात्रे । वै । अन्नम् ।

अद्यते । सयोनीति स – योनि । एव । अन्नम् । अवेति । रुन्धे ।

एति । द्वादशात् । पुरुषात् । अन्नम् । अत्ति । अथो इति । पात्रात् ।

न । छिद्यते । यस्य । एताः । उपधीयन्त इत्युप–धीयन्ते । यः । उ ।

च । एनाः । एवम् । वेद । कुंभाः । च । कुंभीः । च । मिथुनानि ।

भवन्ति । मिथुनस्य । प्रजात्या इति प्र – जात्यै । प्रेति ।

प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । मिथुनैः । जायते ।
यस्य । एताः । उपधीयन्त इत्युप – धीयन्ते । यः । उ । **7 (50)**

**TS 5.6.2.4**

चैना एवं ँवेद शुग्–वा अग्निः सो ऽद्ध्वर्युं ँयजमानं प्रजाः
शुचा ऽर्पयति यदप उपदधाति शुचमेवास्य शमयति
नाऽऽर्तिमार्च्छत्यद्ध्वर्युर्न यजमानः शाम्यन्ति प्रजा यत्रैता उपधीयन्ते
ऽपां ँवा एतानि हृदयानि यदेता आपो यदेता अप उपदधाति
दिव्याभिरेवैनाः सं॒ सृजति वर्.षुकः पर्जन्यो – [ ] **8**

**TS 5.6.2.4 - Padam**

च । एनाः । एवम् । वेद । शुक् । वै । अग्निः । सः । अद्ध्वर्युम् ।
यजमानम् । प्रजा इति प्र – जाः । शुचा । अर्पयति । यत् । अपः ।
उपदधातीत्युप – दधाति । शुचम् । एव । अस्य । शमयति । न ।
आर्तिम् । एति । ऋच्छति । अद्ध्वर्युः । न । यजमानः । शाम्यन्ति ।
प्रजा इति प्र – जाः । यत्र । एताः । उपधीयन्त इत्युप – धीयन्ते ।
अपाम् । वै । एतानि । हृदयानि । यत् । एताः । आपः । यत् ।

एताः । अपः । उपदधातीत्युप – दधाति । दिव्याभिः । एव । एनाः । समिति । सृजति । वर्.षुकः । पर्जन्यः । **8 (50)**

**TS 5.6.2.5**

भवति यो वा एतासा–मायतनं क्लृप्तिं ँवेदाऽऽयतनवान् भवति कल्पते ऽस्मा अनुसीत–मुप दधात्येतद्–वा आसामायतनमेषा क्लृप्तिर्य एवं ँवेदाऽऽयतनवान् भवति कल्पतेऽस्मै द्वन्द्वमन्या उप दधाति चतस्रो मद्ध्ये धृत्या अन्नं ँवा इष्टका एतत् खलु वै साक्षादन्नं ँयदेष चरुर्यदेतं चरुमुप दधाति साक्षा – [ ] **9**

**TS 5.6.2.5 - Padam**

भवति । यः । वै । एतासाम् । आयतनमित्या – यतनम् । क्लृप्तिम् । वेद । आयतनवानित्यायतन – वान् । भवति । कल्पते । अस्मै । अनुसीतमित्यनु – सीतम् । उपेति । दधाति । एतत् । वै । आसाम् । आयतनमित्या – यतनम् । एषा । क्लृप्तिः । यः । एवम् । वेद । आयतनवानित्यायतन – वान् । भवति । कल्पते । अस्मै । द्वन्द्वमिति द्वं – द्वम् । अन्याः । उपेति । दधाति । चतस्रः । मद्ध्ये । धृत्यै ।

अन्नम् । वै । इष्टकाः । एतत् । खलु । वै । साक्षादिति स–अक्षात् ।

अन्नम् । यत् । एषः । चरुः । यत् । एतम् । चरुम् ।

उपदधातीत्युप – दधाति । साक्षादिति स – अक्षात् । **9 (50)**

**<u>TS 5.6.2.6</u>**

देवास्मा अन्नमव रुन्धे मद्ध्यत उप दधाति मद्ध्यत एवास्मा अन्नं

दधाति तस्मान् मद्ध्यतो ऽन्न–मद्यते बार्.हस्पत्यो भवति ब्रह्म वै

देवानां बृहस्पति–र्ब्रह्मणैवास्मा अन्नमव रुन्धे ब्रह्मवर्चसमसि

ब्रह्मवर्चसाय त्वेत्याह तेजस्वी ब्रह्मवर्चसी भवति यस्यैष उपधीयते

य उ चैनमेवं ँवेद ॥ **10**

**<u>TS 5.6.2.6 - Padam</u>**

एव । अस्मै । अन्नम् । अवेति । रुन्धे । मद्ध्यतः । उपेति ।

दधाति । मद्ध्यतः । एव । अस्मै । अन्नम् । दधाति । तस्मात् ।

मद्ध्यतः । अन्नम् । अद्यते । बार्.हस्पत्यः । भवति । ब्रह्म । वै ।

देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । अस्मै । अन्नम् । अवेति ।

रुन्धे । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । असि ।
ब्रह्मवर्चसायेति ब्रह्म – वर्चसाय । त्वा । इति । आह । तेजस्वी ।
ब्रह्मवर्चसीति ब्रह्म – वर्चसी । भवति । यस्य । एषः । उपधीयत
इत्युप – धीयते । यः । उ । च । एनम् । एवम् । वेद ॥ **10 (47)**

***(अमृत – मस्मै – जायते यस्यैता – उपधीयन्ते य उ – पर्जन्य – उपदधाति साक्षाथ् – सप्तचत्वारिꣳशच्च) (A2)***

**TS 5.6.3.1**

भूतेष्टका उप दधात्यत्रात्र वै मृत्युर्जायते यत्रयत्रैव मृत्युर्जायते
तत एवैनमव यजते तस्मादग्निचिथ् सर्वमायुरेति सर्वे ह्यस्य
मृत्यवो ऽवेष्टा स्तस्मा–दग्निचिन्ना–भिचरितवै प्रत्यगेन–मभिचारः
स्तृणुते सूयते वा एष योऽग्निं चिनुते देवसुवा–मेतानि हवीꣳषि
भवन्त्येतावन्तो वै देवानाꣳ सवास्त एवा– [ ] **11**

**TS 5.6.3.1 - Padam**

भूतेष्टका इति भूत – इष्टकाः । उपेति । दधाति । अत्रात्रेत्यत्र–अत्र ।
वै । मृत्युः । जायते । यत्रयत्रेति यत्र–यत्र । एव । मृत्युः । जायते ।

ततः । एव । एनम् । अवेति । यजते । तस्मात् ।

अग्निचिदित्यग्नि – चित् । सर्वम् । आयुः । एति । सर्वे । हि ।

अस्य । मृत्यवः । अवेष्टा इत्यव – इष्टाः । तस्मात् ।

अग्निचिदित्यग्नि – चित् । न । अभिचरितवा इत्यभि–चरितवै ।

प्रत्यक् । एनम् । अभिचार इत्यभि – चारः । स्तृणुते । सूयते । वै ।

एषः । यः । अग्निम् । चिनुते । देवसुवामिति देव – सुवाम् ।

एतानि । हवीꣳषि । भवन्ति । एतावन्तः । वै । देवानाम् । सवाः ।

ते । एव । **11 (50)**

**<u>TS 5.6.3.2</u>**

–स्मै सवान् प्र यच्छन्ति त एनꣳ सुवन्ते सवोऽग्निर्वरुणसवो

राजसूयं ब्रह्मसवश्चित्यो देवस्य त्वा सवितुः प्रसव इत्याह

सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभि षिञ्चत्यन्नस्यान्नस्याभि

षिञ्चत्यन्नस्यान्नस्या–वरुद्ध्यै पुरस्तात् प्रत्यञ्चमभि षिञ्चति

पुरस्ताद्धि प्रतीचीन-मन्नमद्यते शीर्.षतो ऽभि षिञ्चति शीर्.षतो ह्यन्नमद्यत आ मुखादन्ववस्रावयति - [ ] 12

**TS 5.6.3.2 - Padam**

अस्मै । सवान् । प्रेति । यच्छन्ति । ते । एनम् । सुवन्ते । सवः । अग्निः । वरुणसव इति वरुण - सवः । राजसूयमिति राज - सूयम् । ब्रह्मसव इति ब्रह्म-सवः । चित्यः । देवस्य । त्वा । सवितुः । प्रसव इति प्र - सवे । इति । आह । सवितृप्रसूत इति सवितृ-प्रसूतः । एव । एनम् । ब्रह्मणा । देवताभिः । अभीति । सिञ्चति । अन्नस्यान्नस्येत्यन्नस्य - अन्नस्य । अभीति । सिञ्चति । अन्नस्यान्नस्येत्यन्नस्य - अन्नस्य । अवरुद्ध्या इत्यव - रुद्ध्यै । पुरस्तात् । प्रत्यञ्चम् । अभीति । सिञ्चति । पुरस्तात् । हि । प्रतीचीनम् । अन्नम् । अद्यते । शीर्.षतः । अभीति । सिञ्चति । शीर्.षतः । हि । अन्नम् । अद्यते । एति । मुखात् । अन्ववस्रावयतीत्यनु - अवस्रावयति । **12 (50)**

**TS 5.6.3.3**

मुखत एवास्मा अन्नाद्यं दधात्यग्ने स्त्वा साम्राज्येनाभि

षिञ्चामीत्याहैष वा अग्नेः सव–स्तेनैवैनमभि षिञ्चति बृहस्पतेस्त्वा

साम्राज्येनाभिषिञ्चामीत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि

षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चा–मीत्याहेन्द्रियमेवास्मि–

न्नुपरिष्टाद् दधात्ये तद् – [ ] **13**

**TS 5.6.3.3 - Padam**

मुखतः । एव । अस्मै । अन्नाद्यमित्यन्न–अद्यम् । दधाति । अग्नेः ।

त्वा । साम्राज्येनेति सां – राज्येन । अभीति । सिञ्चामि । इति ।

आह । एषः । वै । अग्नेः । सवः । तेन । एव । एनम् । अभीति ।

सिञ्चति । बृहस्पतेः । त्वा । साम्राज्येनेति सां–राज्येन । अभीति ।

सिञ्चामि । इति । आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा ।

एव । एनम् । अभीति । सिञ्चति । इन्द्रस्य । त्वा । साम्राज्येनेति

सां – राज्येन । अभीति । सिञ्चामि । इति । आह । इन्द्रियम् । एव ।

अस्मिन्न् । उपरिष्टात् । दधाति । एतत् । **13 (50)**

**TS 5.6.3.4**

वै राजसूयस्य रूपं ँय एवं ँविद्वानग्निं चिनुत उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्निचित इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं ँवीर्यं परा ऽपतत् तद्–देवाः सौत्रामण्या समभरन्थ् सूयते वा एष यो ऽग्निं चिनुते ऽग्निं चित्वा सौत्रामण्या यजेतेन्द्रियमेव वीर्यᳪं संभृत्याऽऽत्मन् धत्ते ॥ **14**

**TS 5.6.3.4 - Padam**

वै । राजसूयस्येति राज – सूयस्य । रूपम् । यः । एवम् । विद्वान् । अग्निम् । चिनुते । उभौ । एव । लोकौ । अभीति । जयति । यः । च । राजसूयेनेति राज – सूयेन । ईजानस्य । यः । च । अग्निचित इत्यग्नि – चितः । इन्द्रस्य । सुषुवाणस्य । दशधेति दश – धा । इन्द्रियम् । वीर्यम् । परेति । अपतत् । तत् । देवाः । सौत्रामण्या । समिति । अभरन्न् । सूयते । वै । एषः । यः । अग्निम् । चिनुते । अग्निम् । चित्वा । सौत्रामण्या । यजेत । इन्द्रियम् । एव । वीर्यम् । संभृत्येति सं – भृत्य । आत्मन्न् । धत्ते ॥ **14 (48)**

*(त एवा – न्ववस्रावयत्ये – त – दष्टाचत्वारिꣳशच्च) (A3)*

**TS 5.6.4.1**

सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य एतशेन

सजोषावश्विना दꣳसोभिः सजूरग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा

सँवथ्सरो वा अब्दो मासा अयावा उषा अरुणी सूर्य एतश इमे

अश्विना सँवथ्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ

सँवथ्सरं पशवो ऽनु प्र जायन्ते सँवथ्सरेणैवास्मै पशून्

प्र जनयति दर्भस्तम्बे जुहोति यद् – [ ] **15**

**TS 5.6.4.1 - Padam**

सजूरिति स – जूः । अब्दः । अयावभिरित्ययाव – भिः । सजूरिति

स – जूः । उषाः । अरुणीभिः । सजूरिति स – जूः । सूर्यः ।

एतशेन । सजोषाविति स – जोषौ । अश्विना । दꣳसोभिरिति

दꣳसः – भिः । सजूरिति स–जूः । अग्निः । वैश्वानरः । इडाभिः ।

घृतेन । स्वाहा । सँवथ्सर इति सं–वथ्सरः । वै । अब्दः । मासाः ।

अयावाः । उषाः । अरुणी । सूर्यः । एतशः । इमे इति । अश्विना ।

सँवथ्सर इति सं – वथ्सरः । अग्निः । वैश्वानरः । पशवः । इडा ।
पशवः । घृतम् । सँवथ्सरमिति सं – वथ्सरम् । पशवः । अनु ।
प्रेति । जायन्ते । सँवथ्सरेणेति सं – वथ्सरेण । एव । अस्मै ।
पशून् । प्रेति । जनयति । दर्भस्तंब इति दर्भ – स्तंबे । जुहोति ।
यत् । **15 (50)**

**<u>TS 5.6.4.2</u>**

वा अस्या अमृतं ँयद्–वीर्यं तद्–दर्भा स्तस्मिन् जुहोति प्रैव जायते
ऽन्नादो भवति यस्यैवं जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागा स्ता
एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात् प्रति दधात्यनन्धो भवति य
एवं ँवेदाऽऽपो वा इदमग्रे सलिलमासीथ् स प्रजापतिः पुष्करपर्णे
वातो भूतोऽलेलायथ् स – [ ] **16**

**<u>TS 5.6.4.2 - Padam</u>**

वै । अस्याः । अमृतम् । यत् । वीर्यम् । तत् । दर्भाः । तस्मिन्न् ।
जुहोति । प्रेति । एव । जायते । अन्नाद इत्यन्न – अदः । भवति ।
यस्य । एवम् । जुह्वति । एताः । वै । देवताः । अग्नेः ।

पुरस्ताद्भागा इति पुरस्तात् – भागाः । ताः । एव । प्रीणाति ।
अथो इति । चक्षुः । एव । अग्नेः । पुरस्तात् । प्रतीति । दधाति ।
अनन्धः । भवति । यः । एवम् । वेद । आपः । वै । इदम् । अग्रे ।
सलिलम् । आसीत् । सः । प्रजापतिरिति प्रजा – पतिः । पुष्करपर्ण
इति पुष्कर – पर्णे । वातः । भूतः । अलेलायत् । सः । **16 (50)**

**TS 5.6.4.3**

प्रतिष्ठां नाविन्दत स एतदपां कुलायमपश्यत् तस्मिन्नग्निमचिनुत
तदियमभवत् ततो वै स प्रत्यतिष्ठद्–यां पुरस्तादुपादधात् तच्छिरो
ऽभवथ् सा प्राची दिग्–यां दक्षिणत उपादधाथ् स दक्षिणः
पक्षो ऽभवथ् सा दक्षिणा दिग्–यां पश्चा–दुपादधात् तत्
पुच्छमभवथ् सा प्रतीची दिग्–या–मुत्तरत उपादधाथ्– [ ] **17**

**TS 5.6.4.3 - Padam**

प्रतिष्ठामिति प्रति – स्थाम् । न । अविन्दत । सः । एतत् । अपाम् ।
कुलायम् । अपश्यत् । तस्मिन्न् । अग्निम् । अचिनुत । तत् ।
इयम् । अभवत् । ततः । वै । सः । प्रतीति । अतिष्ठत् । याम् ।

पुरस्तात् । उपादधादित्युप – अदधात् । तत् । शिरः । अभवत् ।
सा । प्राची । दिक् । याम् । दक्षिणतः । उपादधादित्युप – अदधात् ।
सः । दक्षिणः । पक्षः । अभवत् । सा । दक्षिणा । दिक् । याम् ।
पश्चात् । उपादधादित्युप–अदधात् । तत् । पुच्छम् । अभवत् । सा ।
प्रतीची । दिक् । याम् । उत्तरत इत्युत् – तरतः ।
उपादधादित्युप – अदधात् । **17 (50)**

**TS 5.6.4.4**

स उत्तरः पक्षो ऽभवथ् सोदीची दिग्–यामुपरिष्टा–दुपादधात् तत्
पृष्ठमभवथ् सोर्द्ध्वा दिगियं ँवा अग्निः पञ्चेष्टक–स्तस्माद्–यदस्यां
खनन्त्यभीष्टकां तृन्दन्त्यभि शर्करा॒ सर्वा वा इयं ँवयोभ्यो नक्तं
दृशे दीप्यते तस्मादिमां ँवया॒सि नक्तं नाद्ध्यासते य एवं
ँविद्वानग्निं चिनुते प्रत्येव– [ ] **18**

**TS 5.6.4.4 - Padam**

सः । उत्तर इत्युत् – तरः । पक्षः । अभवत् । सा । उदीची । दिक् ।
याम् । उपरिष्टात् । उपादधादित्युप – अदधात् । तत् । पृष्ठम् ।

अभवत् । सा । ऊर्द्ध्वा । दिक् । इयम् । वै । अग्निः । पञ्चेष्टक इति पञ्च–इष्टकः । तस्मात् । यत् । अस्याम् । खनन्ति । अभीति । इष्टकाम् । तृन्दन्ति । अभीति । शर्कराम् । सर्वा । वै । इयम् । वयोभ्य इति वयः – भ्यः । नक्तम् । दृशे । दीप्यते । तस्मात् । इमाम् । वयाꣳसि । नक्तम् । न । अधीति । आसते । यः । एवम् । विद्वान् । अग्निम् । चिनुते । प्रतीति । एव । **18 (50)**

**TS 5.6.4.5**

तिष्ठत्यभि दिशो जयत्याग्नेयो वै ब्राह्मणस्तस्माद् ब्राह्मणाय सर्वासु दिक्ष्वर्द्धुकꣳ स्वामेव तद्–दिशमन्वेत्यपां ँवा अग्निः कुलायं तस्मादापो ऽग्निꣳ हारुकाः स्वामेव तद्–योनिं प्र विशन्ति ॥ **19**

**TS 5.6.4.5 - Padam**

तिष्ठति । अभीति । दिशः । जयति । आग्नेयः । वै । ब्राह्मणः । तस्मात् । ब्राह्मणाय । सर्वासु । दिक्षु । अर्द्धुकम् । स्वाम् । एव । तत् । दिशम् । अन्विति । एति । अपाम् । वै । अग्निः । कुलायम् । तस्मात् । आपः । अग्निम् । हारुकाः । स्वाम् । एव । तत् ।

योनिम् । प्रेति । विशन्ति ॥ 19 (32)

*(यद्– लेलायथ् स–उत्तरत उपादधा–देव – द्वात्रि॒ꣳशच्च) (A4)*

**TS 5.6.5.1**

सँवथ्सरमुख्यं भृत्वा द्वितीये सँवथ्सर आग्नेयमष्टाकपालं

निर्वपेदैन्द्र–मेकादशकपालं वैँश्वदेवं द्वादशकपालं बार्.हस्पत्यं चरुं

वैँष्णवं त्रिकपालं तृतीये सँवथ्सरेऽभिजिता यजेत यदष्टाकपालो

भवत्यष्टाक्षरा गायत्र्याग्नेयं गायत्रं प्रातस्सवनं प्रातस्सवनमेव

तेन दाधार गायत्रीं छन्दो यदेकादशकपालो भवत्येकादशाक्षरा

त्रिष्टुगैन्द्रं त्रैष्टुभं माद्ध्यन्दिनꣳ सवनं माद्ध्यन्दिनमेव सवनं तेन

दाधार त्रिष्टुभं– [ ] 20

**TS 5.6.5.1 - Padam**

सँवथ्सरमिति सं – वथ्सरम् । उख्यम् । भृत्वा । द्वितीये । सँवथ्सर

इति सं – वथ्सरे । आग्नेयम् । अष्टाकपालमित्यष्टा – कपालम् ।

निरिति । वपेत् । ऐन्द्रम् । एकादशकपालमित्येकादश – कपालम् ।

वैश्वदेवमिति वैश्व – देवम् । द्वादशकपालमिति द्वादश – कपालम् ।

बार्.हस्पत्यम् । चरुम् । वैष्णवम् । त्रिकपालमिति त्रि – कपालम् ।
तृतीये । सँवथ्सर इति सं – वथ्सरे । अभिजितेत्यभि – जिता ।
यजेत । यत् । अष्टाकपाल इत्यष्टा – कपालः । भवति ।
अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री । आग्नेयम् । गायत्रम् ।
प्रातस्सवनमिति प्रातः – सवनम् । प्रातस्सवनमिति प्रातः–सवनम् ।
एव । तेन । दाधार । गायत्रीम् । छन्दः । यत् । एकादशकपाल
इत्येकादश – कपालः । भवति । एकादशाक्षरेत्येकादश – अक्षरा ।
त्रिष्टुक् । ऐन्द्रम् । त्रैष्टुभम् । माद्ध्यन्दिनम् । सवनम् । माद्ध्यन्दिनम् ।
एव । सवनम् । तेन । दाधार । त्रिष्टुभम् । **20 (50)**

**<u>TS 5.6.5.2</u>**

छन्दो यद्–द्वादशकपालो भवति द्वादशाक्षरा जगती वैश्वदेवं जागतं
तृतीयसवनं तृतीयसवनमेव तेन दाधार जगतीं छन्दो
यद्–बार्.हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मैव
तेन दाधार यद्–वैष्णव स्त्रिकपालो भवति यज्ञो वै विष्णुर्यज्ञमेव

तेन दाधार यत् तृतीये सँवथ्सरे ऽभिजिता यजते ऽभिजित्यै

यथ् सँवथ्सरमुख्यं बिभर्तीममेव– [ ] **21**

**TS 5.6.5.2 - Padam**

छन्दः । यत् । द्वादशकपाल इति द्वादश – कपालः । भवति ।

द्वादशाक्षरेति द्वादशा–अक्षरा । जगती । वैश्वदेवमिति वैश्व – देवम् ।

जागतम् । तृतीयसवनमिति तृतीय – सवनम् । तृतीयसवनमिति

तृतीय – सवनम् । एव । तेन । दाधार । जगतीम् । छन्दः । यत् ।

बार्.हस्पत्यः । चरुः । भवति । ब्रह्म । वै । देवानाम् । बृहस्पतिः ।

ब्रह्म । एव । तेन । दाधार । यत् । वैष्णवः । त्रिकपाल इति

त्रि – कपालः । भवति । यज्ञः । वै । विष्णुः । यज्ञम् । एव । तेन ।

दाधार । यत् । तृतीये । सँवथ्सर इति सं – वथ्सरे ।

अभिजितेत्यभि – जिता । यजते । अभिजित्या इत्यभि – जित्यै ।

यत् । सँवथ्सरमिति सं – वथ्सरम् । उख्यम् । बिभर्ति । इमम् ।

एव । **21 (50)**

**TS 5.6.5.3**

तेन लोक॒ꣳ स्पृणोति॒ यद् द्वि॒तीये॑ सँवथ्स॒रेऽग्निं चि॒नु॒ते ऽन्तरिक्षमे॒व

तेन स्पृणोति॒ यत् तृ॒तीये॑ सँवथ्स॒रे यज॒ते ऽमुमे॒व तेन लो॒कꣳ

स्पृणोत्ये॒तं ँवै पर आट्॒णा॒रः क॒क्षीवा॑ꣳ औशि॒जो वी॒तह॑व्यः

श्राय॒सस्त्र॒सद॑स्युः पौरुकु॒थ्स्यः प्र॒जाकामा अचिन्व॒त तत॒ो वै ते

स॒हस्र॑ꣳसहस्रं पु॒त्रानविन्द॒न्त प्रथते प्र॒जया प॒शु॒भिस्तां मात्रामाप्नोति॒

यां तेऽग॒च्छ॒न्. य ए॒वं ( ) ँवि॒द्वा॒ने॒तमग्निं चि॒नु॒ते ॥ **22**

**TS 5.6.5.3 - Padam**

तेन । लो॒कम् । स्पृ॒णो॒ति॒ । यत् । द्वि॒तीये॑ । स॒ँव॒थ्स॒र इति

सं – व॒थ्स॒रे । अ॒ग्निम् । चि॒नु॒ते । अ॒न्तरि॑क्षम् । ए॒व । तेन ।

स्पृ॒णो॒ति॒ । यत् । तृ॒तीये॑ । स॒ँव॒थ्स॒र इति सं – व॒थ्स॒रे । यजते ।

अ॒मुम् । ए॒व । तेन । लो॒कम् । स्पृ॒णो॒ति॒ । ए॒तम् । वै । परः ।

आ॒ट्॒णा॒रः । क॒क्षी॒वा॒निति॑ क॒क्षी – वा॒न् । औ॒शि॒जः ।

वी॒तह॑व्य इ॒ति वी॒त – ह॒व्यः । श्रा॒य॒सः । त्र॒सद॑स्युः । पौ॒रु॒कु॒थ्स्य

इति पौरु – कु॒थ्स्यः । प्र॒जाका॑म॒ा इति प्र॒जा–का॒मा॒ः । अ॒चि॒न्व॒त ।

ततः । वै । ते । सहस्रꣳसहस्रमिति सहस्रं – सहस्रम् । पुत्रान् ।
अविन्दन्त । प्रथते । प्रजयेति प्र – जया । पशुभिरिति पशु–भिः ।
ताम् । मात्राम् । आप्नोति । याम् । ते । अगच्छन्न् । यः । एवम् ( ) ।
विद्वान् । एतम् । अग्निम् । चिनुते ॥ **22 (54)**

*(दाधार त्रिष्टुभ – मिममेवै – वं – चत्वारि च) (A5)*

**TS 5.6.6.1**

प्रजापति–रग्नि–मचिनुत स क्षुरपविर्भूत्वा ऽतिष्ठत् तं देवा बिभ्यतो
नोपाऽऽयन् ते छन्दोभिरात्मानं छादयित्वोपाऽऽयन् तच्छन्दसां
छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्–रूपं यँत् कृष्णाजिनं
कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवाऽऽत्मानं छादयित्वा ऽग्निमुप
चरत्यात्मनो ऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्नि–[ ] **23**

**TS 5.6.6.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । अग्निम् । अचिनुत । सः ।
क्षुरपविरिति क्षुर – पविः । भूत्वा । अतिष्ठत् । तम् । देवाः ।
बिभ्यतः । न । उपेति । आयन्न् । ते । छन्दोभिरिति छन्दः – भिः ।

आत्मानम् । छादयित्वा । उपेति । आयन्न् । तत् । छन्दसाम् ।
छन्दस्त्वमिति छन्दः – त्वम् । ब्रह्म । वै । छन्दाꣳसि । ब्रह्मणः ।
एतत् । रूपम् । यत् । कृष्णाजिनमिति कृष्ण – अजिनम् ।
कार्ष्णी इति । उपानहौ । उपेति । मुञ्चते । छन्दोभिरिति
छन्दः – भिः । एव । आत्मानम् । छादयित्वा । अग्निम् । उपेति ।
चरति । आत्मनः । अहिꣳसायै । देवनिधिरिति देव – निधिः । वै ।
एषः । नीति । धीयते । यत् । अग्निः । **23 (50)**

**<u>TS 5.6.6.2</u>**

–रन्ये वा वै निधिमगुप्तं विँन्दन्ति न वा प्रति प्र जानात्युखामा
क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्या अथो खल्वाहुर्ना ऽऽक्रम्येति
नैर्.ऋत्युखा यदाक्रामेन्निर्.ऋत्या आत्मानमपि दद्ध्यात्
तस्मान्नाऽऽक्रम्या पुरुषशीर्.षमुप दधाति गुप्त्या अथो यथा
ब्रूयादेतन्मे गोपायेति तादृगेव तत्– [ ] **24**

**TS 5.6.6.2 - Padam**

अ॒न्ये । वा॒ । वै । नि॒धिमिति॑ नि – धिम् । अगु॑प्तम् । वि॒न्दन्ति॑ । न ।

वा॒ । प्रति॑ । प्रेति॑ । जा॒ना॒ति॒ । उ॒खाम् । एति॑ । क्रा॒म॒ति॒ । आ॒त्मा᳚नम् ।

ए॒व । अ॒धि॒पामित्य॑धि – पाम् । कु॒रु॒ते॒ । गुप्त्यै᳚ । अथो॒ इति॑ । खलु॑ ।

आ॒हु॒ः । न । आ॒क्रम्येत्या᳚ – क्रम्या᳚ । इति॑ । नै॒र्॒.ऋ॒तीति॑ नैः–ऋ॒ती ।

उ॒खा । यत् । आ॒क्रा॒मे॒दित्या᳚ – क्रामे᳚त् । निर्.ऋ॑त्या॒ इति॒ निः–ऋ॒त्यै॒ ।

आ॒त्मा᳚नम् । अपी॑ति । द॒द्ध्या॒त् । तस्मा᳚त् । न । आ॒क्रम्येत्या᳚–क्रम्या᳚ ।

पु॒रु॒ष॒शी॒र्॒.षमिति॑ पुरुष – शी॒र्॒.षम् । उपे॑ति । द॒धा॒ति॒ । गुप्त्यै᳚ ।

अथो॒ इति॑ । यथा᳚ । ब्रू॒यात् । ए॒तत् । मे॒ । गो॒पा॒य॒ । इति॑ । ता॒दृक् ।

ए॒व । तत् । **24 (50)**

**TS 5.6.6.3**

प्र॒जाप॑ति॒र्वा अथ॑र्वा॒ ऽग्निरे॒व द॒द्ध्यङ्ङा॑थर्व॒ण स्तस्येष्ट॑का

अ॒स्था॒न्ये॒त॒ꣳ ह॒ वाव तद्–ऋषि–र॒भ्यनू॑वा॒चेन्द्रो॑ दधी॒चो अ॒स्थभि॒रिति॒

यदि॑ष्टकाभि॒रग्निं चि॒नोति॒ सात्मान॑मे॒वाग्निं चि॑नु॒ते सात्मा॒मुष्मि॑न् ँल्लो॒के

भवति य एवं ँवेद शरीरं ँवा एतदग्नेर्यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव सᳪस्कृत्या- [ ] 25

## TS 5.6.6.3 - Padam

प्रजापतिरिति प्रजा - पतिः । वै । अथर्वा । अग्निः । एव । दद्ध्यङ् । आथर्वणः । तस्य । इष्टकाः । अस्थानि । एतम् । ह । वाव । तत् । ऋषिः । अभ्यनूवाचेत्यभि - अनूवाच । इन्द्रः । दधीचः । अस्थभिरित्यस्थ - भिः । इति । यत् । इष्टकाभिः । अग्निम् । चिनोति । सात्मानमिति स - आत्मानम् । एव । अग्निम् । चिनुते । सात्मेति स - आत्मा । अमुष्मिन्न् । लोके । भवति । यः । एवम् । वेद । शरीरम् । वै । एतत् । अग्नेः । यत् । चित्यः । आत्मा । वैश्वानरः । यत् । चिते । वैश्वानरम् । जुहोति । शरीरम् । एव । सᳪस्कृत्य । 25 (50)

## TS 5.6.6.4

-भ्यारोहति शरीरं ँवा एतद्-यजमानः सᳪ स्कुरुते यदग्निं चिनुते यच्चिते वैश्वानरं जुहोति शरीरमेव सᳪस्कृत्या ऽऽत्मना ऽभ्यारोहति

तस्मात् तस्य नाव द्यन्ति जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुप

दधातीयं ँवा अग्निर्वैश्वानर स्तस्यैषा चितिर्यत् पुरीषमग्निमेव

वैश्वानरं चिनुत एषा वा अग्नेः ( ) प्रिया तनूर्यद्–वैश्वानरः

प्रियामेवास्य तनुवमव रुन्धे ॥ **26**

**TS 5.6.6.4 - Padam**

अभ्यारोहतीत्यभि – आरोहति । शरीरम् । वै । एतत् । यजमानः ।

समिति । कुरुते । यत् । अग्निम् । चिनुते । यत् । चिते । वैश्वानरम् ।

जुहोति । शरीरम् । एव । स७स्कृत्य । आत्मना ।

अभ्यारोहतीत्यभि –आरोहति । तस्मात् । तस्य । न । अवेति ।

द्यन्ति । जीवन्न् । एव । देवान् । अपीति । एति । वैश्वानर्या । ऋचा ।

पुरीषम् । उपेति । दधाति । इयम् । वै । अग्निः । वैश्वानरः । तस्य ।

एषा । चितिः । यत् । पुरीषम् । अग्निम् । एव । वैश्वानरम् । चिनुते ।

एषा । वै । अग्नेः ( ) । प्रिया । तनूः । यत् । वैश्वानरः । प्रियाम् ।

एव । अस्य । तनुवम् । अवेति । रुन्धे ॥ **26 (60)**

## *(अग्नि – स्तथ् – सꣳस्कृत्या – ग्ने – र्दश च) (A6)*

**TS 5.6.7.1**

अग्नेर्वै दीक्षया देवा विराजमाप्नुवन् तिस्रो रात्रीर्दीक्षितः स्यात्
त्रिपदा विराड् विराजमाप्नोति षड्–रात्रीर्दीक्षितः स्याथ् षड् वा
ऋतवः सꣳवथ्सरः सꣳवथ्सरो विराड् विराजमाप्नोति दश रात्रीर्दीक्षितः
स्याद्–दशाक्षरा विराड् विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्याद्
द्वादश मासाः सꣳवथ्सरः सꣳवथ्सरो विराड् विराजमाप्नोति त्रयोदश
रात्रीर्दीक्षितः स्यात् त्रयोदश – [ ] **27**

**TS 5.6.7.1 - Padam**

अग्नेः । वै । दीक्षया । देवाः । विराजमिति वि–राजम् । आप्नुवन्न् ।
तिस्रः । रात्रीः । दीक्षितः । स्यात् । त्रिपदेति त्रि – पदा ।
विराडिति वि – राट् । विराजमिति वि – राजम् । आप्नोति । षट् ।
रात्रीः । दीक्षितः । स्यात् । षट् । वै । ऋतवः । सꣳवथ्सर इति
सं – वथ्सरः । सꣳवथ्सर इति सं – वथ्सरः । विराडिति वि–राट् ।
विराजमिति वि – राजम् । आप्नोति । दश । रात्रीः । दीक्षितः ।

स्यात् । दशाक्षरेति दश – अक्षरा । विराडिति वि – राट् ।
विराजमिति वि – राजम् । आप्नोति । द्वादश । रात्रीः । दीक्षितः ।
स्यात् । द्वादश । मासाः । सँवथ्सर इति सं – वथ्सरः ।
सँवथ्सर इति सं – वथ्सरः । विराडिति वि – राट् । विराजमिति
वि – राजम् । आप्नोति । त्रयोदशेति त्रयः – दश । रात्रीः ।
दीक्षितः । स्यात् । त्रयोदशेति त्रयः – दश । **27 (50)**

**<u>TS 5.6.7.2</u>**

मासाः सँवथ्सरः सँवथ्सरो विराड् विराजमाप्नोति पञ्चदश
रात्रीर्दीक्षितः स्यात् पञ्चदश वा अर्द्धमासस्य रात्रयो ऽर्द्धमासशः
सँवथ्सर आप्यते सँवथ्सरो विराड् विराजमाप्नोति सप्तदश
रात्रीर्दीक्षितः स्याद् द्वादश मासाः पञ्चर्तवः स सँवथ्सरः
सँवथ्सरो विराड् विराजमाप्नोति चतुर्विꣳशतिꣳ रात्रीर्दीक्षितः
स्या–च्चतुर्विꣳशति–रर्द्धमासाः सँवथ्सरः सँवथ्सरो विराड्
विराजमाप्नोति त्रिꣳशतꣳ रात्रीर्दीक्षितः स्यात् – [ ] **28**

**TS 5.6.7.2 - Padam**

मासाः । सँवथ्सर इति सं–वथ्सरः । सँवथ्सर इति सं–वथ्सरः ।
विराडिति वि – राट् । विराजमिति वि – राजम् । आप्नोति ।
पञ्चदशेति पञ्च – दश । रात्रीः । दीक्षितः । स्यात् । पञ्चदशेति
पञ्च – दश । वै । अर्द्धमासस्येत्यर्द्ध – मासस्य । रात्रयः ।
अर्द्धमासश इत्यर्द्धमास – शः । सँवथ्सर इति सं – वथ्सरः ।
आप्यते । सँवथ्सर इति सं – वथ्सरः । विराडिति वि – राट् ।
विराजमिति वि – राजम् । आप्नोति । सप्तदशेति सप्त – दश ।
रात्रीः । दीक्षितः । स्यात् । द्वादश । मासाः । पञ्च । ऋतवः । सः ।
सँवथ्सर इति सं – वथ्सरः । सँवथ्सर इति सं – वथ्सरः ।
विराडिति वि – राट् । विराजमिति वि – राजम् । आप्नोति ।
चतुर्वि॒ꣳशतिमिति चतुः – वि॒ꣳशतिम् । रात्रीः । दीक्षितः । स्यात् ।
चतुर्वि॒ꣳशतिरिति चतुः – वि॒ꣳशतिः ।
अर्द्धमासा इत्यर्द्ध–मासाः । सँवथ्सर इति सं – वथ्सरः ।

सँवथ्सर इति सं – वथ्सरः । विराडिति वि – राट् ।

विराजमिति वि – राजम् । आप्नोति । त्रि॒ꣳशतम् । रात्रीः ।

दीक्षितः । स्यात् । **28 (50)**

**TS 5.6.7.3**

त्रि॒ꣳशदक्षरा विराड् विराजमाप्नोति मासं दीक्षितः स्याद्–यो मासः

स सँवथ्सरः सँवथ्सरो विराड् विराजमाप्नोति चतुरो मासो दीक्षितः

स्याच्चतुरो वा एतं मासो वसवो ऽबिभरु स्ते पृथिवीमा ऽजयन्

गायत्रीं छन्दो ऽष्टौ रुद्रास्ते ऽन्तरिक्षमाऽजयन् त्रिष्टुभं छन्दो

द्वादशाऽऽदित्यास्ते दिवमा ऽजयन् जगतीं छन्दस्ततो वै ते ( )

व्यावृत–मगच्छञ्छ्रैष्ठ्यं देवानां तस्माद् द्वादश मासो भृत्वा ऽग्निं

चिन्वीत द्वादश मासाः सँवथ्सरः सँवथ्सरो ऽग्निश्चित्य स्तस्या–

होरात्राणीष्टका आप्तेष्टक–मेनं चिनुते ऽथो व्यावृतमेव गच्छति

श्रैष्ठ्यꣳ समानानां ॥ **29**

## TS 5.6.7.3 - Padam

त्रि॒ꣳ॒शद॑क्ष॒रेति॑ त्रि॒ꣳ॒शत् – अ॒क्ष॒रा॒ । वि॒राडिति॑ वि – राट् ।

वि॒रा॒जमिति॑ वि – रा॒जम् । आ॒प्नो॒ति॒ । मा॒सम् । दी॒क्षि॒तः । स्या॒त् ।

यः । मा॒सः । सः । स॒ँ॒व॒थ्स॒र इति॑ सं – व॒थ्स॒रः । स॒ँ॒व॒थ्स॒र इति॑

सं – व॒थ्स॒रः । वि॒राडिति॑ वि – राट् । वि॒रा॒जमिति॑ वि – रा॒जम् ।

आ॒प्नो॒ति॒ । च॒तुरः॑ । मा॒सः । दी॒क्षि॒तः । स्या॒त् । च॒तुरः॑ । वै । ए॒तम् ।

मा॒सः । वस॑वः । अ॒बि॒भ॒रुः॒ । ते । पृ॒थि॒वीम् । एति॑ । अ॒ज॒य॒न्न् ।

गा॒य॒त्रीम् । छन्दः॑ । अ॒ष्टौ । रु॒द्राः । ते । अ॒न्तरि॑क्षम् । एति॑ । अ॒ज॒य॒न्न् ।

त्रि॒ष्टु॑भम् । छन्दः॑ । द्वाद॑श । आ॒दि॒त्याः । ते । दिव॑म् । एति॑ । अ॒ज॒य॒न्न् ।

जग॑तीम् । छन्दः॑ । ततः॑ । वै । ते ( ) । व्या॒वृ॒तमिति॑ वि – आ॒वृत॑म् ।

अ॒ग॒च्छ॒न्न् । श्रैष्ठ्य॑म् । दे॒वाना॑म् । तस्मा॑त् । द्वाद॑श । मा॒सः । भृ॒त्वा ।

अ॒ग्निम् । चि॒न्वी॒त॒ । द्वाद॑श । मासा॑ः । स॒ँ॒व॒थ्स॒र इति॑ सं – व॒थ्स॒रः ।

स॒ँ॒व॒थ्स॒र इति॑ सं – व॒थ्स॒रः । अ॒ग्निः । चित्यः॑ । तस्य॑ ।

अ॒हो॒रा॒त्राणीत्य॑हः – रा॒त्राणि॑ । इष्ट॑काः । आ॒प्तेष्ट॑क॒मित्या॒प्त–इ॒ष्ट॒क॒म् ।

ए॒न॒म् । चि॒नु॒ते॒ । अथो॑ इति॑ । व्या॒वृ॒तमिति॑ वि – आ॒वृत॑म् । ए॒व ।

गच्छति । श्रैष्ठ्यम् । समानानाम् ॥ 29 (78) *(स्यात् त्रयोदश – त्रिꣳशतꣳ रात्रीर्दीक्षितः स्याद् – वै ते – ऽष्टाविꣳशतिश्च) (A7)*

**TS 5.6.8.1**

सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं ँयन्नान्वारोहेथ् सुवर्गाल्लोकाद्–यजमानो हीयेत पृथिवीमा ऽक्रमिषं प्राणो मा मा हासी–दन्तरिक्षमा ऽक्रमिषं प्रजा मा मा हासीद्–दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्ने–रन्वारोह–स्तेनैवैन–मन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत् पक्षसम्मितां मिनुयात् – [ ] 30

**TS 5.6.8.1 - Padam**

सुवर्गायेति सुवः – गाय । वै । एषः । लोकाय । चीयते । यत् । अग्निः । तम् । यत् । न । अन्वारोहेदित्यनु – आरोहेत् । सुवर्गादिति सुवः–गात् । लोकात् । यजमानः । हीयेत । पृथिवीम् । एति । अक्रमिषम् । प्राण इति प्र – अनः । मा । मा । हासीत् । अन्तरिक्षम् । एति । अक्रमिषम् । प्रजेति प्र – जा । मा । मा । हासीत् । दिवम् । एति । अक्रमिषम् । सुवः । अगन्म । इति ।

आह । एषः । वै । अग्नेः । अन्वारोह इत्यनु–आरोहः । तेन । एव । एनम् । अन्वारोहतीत्यनु – आरोहति । सुवर्गस्येति सुवः – गस्य । लोकस्य । समष्ट्या इति सं – अष्ट्यै । यत् । पक्षसम्मितामिति पक्ष – सम्मिताम् । मिनुयात् । **30 (50)**

**TS 5.6.8.2**

कनीयाꣳसं ँयज्ञक्रतुमुपेयात् पापीयस्यस्याऽऽत्मनः प्रजा स्याद्–वेदिसम्मितां मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्याऽऽत्मनः पापीयसी प्रजा भवति साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसम्मितो वा अयं ँलोक इममेव लोकमभि जयति द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानो द्विषाहस्रं ँवा अन्तरिक्ष–मन्तरिक्षमेवाभि जयति त्रिषाहस्रं चिन्वीत तृतीयं चिन्वान – [ ] **31**

**TS 5.6.8.2 - Padam**

कनीयाꣳसम् । यज्ञक्रतुमिति यज्ञ – क्रतुम् । उपेति । इयात् । पापीयसी । अस्य । आत्मनः । प्रजेति प्र – जा । स्यात् । वेदिसम्मितामिति वेदि – सम्मिताम् । मिनोति । ज्यायाꣳसम् । एव ।

यज्ञक्रतुमिति यज्ञ – क्रतुम् । उपेति । एति । न । अस्य । आत्मनः । पापीयसी । प्रजेति प्र – जा । भवति । साहस्रम् । चिन्वीत । प्रथमम् । चिन्वानः । सहस्रसम्मित इति सहस्र – सम्मितः । वै । अयम् । लोकः । इमम् । एव । लोकम् । अभीति । जयति । द्विषाहस्रमिति द्वि – साहस्रम् । चिन्वीत । द्वितीयम् । चिन्वानः । द्विषाहस्रमिति द्वि – साहस्रम् । वै । अन्तरिक्षम् । अन्तरिक्षम् । एव । अभीति । जयति । त्रिषाहस्रमिति त्रि – साहस्रम् । चिन्वीत । तृतीयम् । चिन्वानः । **31 (50)**

**<u>TS 5.6.8.3</u>**

–स्त्रिषाहस्रो वा असौ लोको ऽमुमेव लोकमभि जयति जानुदघ्नं चिन्वीत प्रथमं चिन्वानो गायत्रियैवेमं ँल्लोक–मभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं चिन्वान स्त्रिष्टुभैवा–न्तरिक्ष–मभ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यैवामुं ँल्लोकमभ्यारोहति नाग्निं

चित्वा रामा–मुपेयादयोनौ रेतो धास्यामीति न द्वितीयं चित्वाऽन्यस्य

स्त्रिय– [ ] **32**

**TS 5.6.8.3 - Padam**

त्रिषाहस्र इति त्रि – साहस्रः । वै । असौ । लोकः । अमुम् । एव ।

लोकम् । अभीति । जयति । जानुदघ्नमिति जानु – दघ्नम् ।

चिन्वीत । प्रथमम् । चिन्वानः । गायत्रिया । एव । इमम् । लोकम् ।

अभ्यारोहतीत्यभि – आरोहति । नाभिदघ्नमिति नाभि – दघ्नम् ।

चिन्वीत । द्वितीयम् । चिन्वानः । त्रिष्टुभा । एव । अन्तरिक्षम् ।

अभ्यारोहतीत्यभि – आरोहति । ग्रीवदघ्नमिति ग्रीव – दघ्नम् ।

चिन्वीत । तृतीयम् । चिन्वानः । जगत्या । एव । अमुम् । लोकम् ।

अभ्यारोहतीत्यभि – आरोहति । न । अग्निम् । चित्वा । रामाम् ।

उपेति । इयात् । अयोनौ । रेतः । धास्यामि । इति । न । द्वितीयम् ।

चित्वा । अन्यस्य । स्त्रियम् । **32 (50)**

**TS 5.6.8.4**

–मुपेयान्न तृतीयं चित्वा कां चनोपेयाद्–रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्–रेतसा व्यृद्ध्येताथो खल्वाहु–रप्रजस्यं तद्–यन्नोपेयादिति यद्–रेतस्सिचावुपदधाति ते एव यजमानस्य रेतो बिभृत स्तस्मा–दुपेयाद्–रेतसो–ऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रो– [ ] **33**

**TS 5.6.8.4 - Padam**

उपेति । इयात् । न । तृतीयम् । चित्वा । काम् । चन । उपेति । इयात् । रेतः । वै । एतत् । नीति । धत्ते । यत् । अग्निम् । चिनुते । यत् । उपेयादित्युप – इयात् । रेतसा । वीति । ऋद्ध्येत । अथो इति । खलु । आहुः । अप्रजस्यमित्यप्र–जस्यम् । तत् । यत् । न । उपेयादित्युप – इयात् । इति । यत् । रेतस्सिचाविति रेतः – सिचौ । उपदधातीत्युप – दधाति । ते इति । एव । यजमानस्य । रेतः । बिभृतः । तस्मात् । उपेति । इयात् । रेतसः । अस्कन्दाय । त्रीणि । वाव । रेताꣳसि । पिता । पुत्रः । पौत्रः । **33 (50)**

**TS 5.6.8.5**

यद् द्वे रेतस्सिचावुपदद्ध्याद्–रेतो ऽस्य वि च्छिन्द्यात् तिस्र उप दधाति रेतसः सन्तत्या इयं ँवाव प्रथमा रेतस्सिग् वाग्–वा इयं तस्मात् पश्यन्तीमां पश्यन्ति वाचं ँवदन्ती–मन्तरिक्षं द्वितीया प्राणो वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राणमसौ तृतीया चक्षुर्वा असौ तस्मात् पश्यन्त्यमूं पश्यन्ति चक्षुर्यजुषेमां चा – [ ] **34**

**TS 5.6.8.5 - Padam**

यत् । द्वे इति । रेतस्सिचाविति रेतः–सिचौ ।
उपदद्ध्यादित्युप–दध्यात् । रेतः । अस्य । वीति । छिन्द्यात् । तिस्रः ।
उपेति । दधाति । रेतसः । सन्तत्या इति सं – तत्यै । इयम् । वाव ।
प्रथमा । रेतस्सिगिति रेतः – सिक् । वाक् । वै । इयम् । तस्मात् ।
पश्यन्ति । इमाम् । पश्यन्ति । वाचम् । वदन्तीम् । अन्तरिक्षम् ।
द्वितीया । प्राण इति प्र – अनः । वै । अन्तरिक्षम् । तस्मात् । न ।
अन्तरिक्षम् । पश्यन्ति । न । प्राणमिति प्र – अनम् । असौ । तृतीया ।

चक्षुः । वै । असौ । तस्मात् । पश्यन्ति । अमूम् । पश्यन्ति । चक्षुः । यजुषा । इमाम् । च । **34 (50)**

**TS 5.6.8.6**

–मूं चोप दधाति मनसा मद्ध्यमा–मेषां ँलोकानां क्लृप्त्या अथो प्राणानामिष्टो यज्ञो भृगुभि–राशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेन दुहे पिता मातरिश्वा ऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः सोमो विश्वविन्नेता नेषद्–बृहस्पतिरु–क्थामदानि शꣳसिषदित्याहैतद्–वा ( ) अग्नेरुक्थं तेनैवैनमनु शꣳसति ॥ **35**

**TS 5.6.8.6 - Padam**

अमूम् । च । उपेति । दधाति । मनसा । मद्ध्यमाम् । एषाम् । लोकानाम् । क्लृप्त्यै । अथो इति । प्राणानामिति प्र – अनानाम् । इष्टः । यज्ञः । भृगुभिरिति भृगु – भिः । आशीर्दा इत्याशीः – दाः । वसुभिरिति वसु – भिः । तस्य । ते । इष्टस्य । वीतस्य । द्रविणा । इह । भक्षीय । इति । आह । स्तुतशस्त्रे इति स्तुत – शस्त्रे । एव ।

एतेन । दुहे । पिता । मातरिश्वा । अच्छिद्रा । पदा । धाः । अच्छिद्राः ।
उशिजः । पदा । अन्विति । तक्षुः । सोमः ।
विश्वविदिति विश्व – वित् । नेता । नेषत् । बृहस्पतिः ।
उक्थामदानीत्युक्थ – मदानि । शꣳसिषत् । इति । आह । एतत् ।
वै ( ) । अग्नेः । उक्थम् । तेन । एव । एनम् । अन्विति ।
शꣳसति ॥ **35 (57)** *(मिनुयात् – तृतीयं चिन्वानः – स्त्रियं – पौत्र – श्च – वै – सप्त च)* *(A8)*

**TS 5.6.9.1**

सूयते वा एषो ऽग्नीनां ँय उखायां भ्रियते यदधः सादयेद्–गर्भाः
प्रपादुकाः स्यु–रथो यथा सवात् प्रत्यवरोहति तादृगेव तदासन्दी
सादयति गर्भाणां धृत्या अप्रपादायाथो सवमेवैनं करोति गर्भो वा
एष यदुख्यो योनिः शिक्यं ँयच्छिक्यादुखां निरूहेद्–योनेर्गर्भं
निर्. हण्याथ् षडुद्यामꣳ शिक्यं भवति षोढाविहितो वै – [ ] **36**

**TS 5.6.9.1 - Padam**

सूयते । वै । एषः । अग्नीनाम् । यः । उखायाम् । भ्रियते । यत् ।
अधः । सादयेत् । गर्भाः । प्रपादुका इति प्र – पादुकाः । स्युः ।
अथो इति । यथा । सवात् । प्रत्यवरोहतीति प्रति – अवरोहति ।
तादृक् । एव । तत् । आसन्दी । सादयति । गर्भाणाम् । धृत्यै ।
अप्रपादायेत्यप्र – पादाय । अथो इति । सवम् । एव । एनम् ।
करोति । गर्भः । वै । एषः । यत् । उख्यः । योनिः । शिक्यम् ।
यत् । शिक्यात् । उखाम् । निरूहेदिति निः – ऊहेत् । योनेः ।
गर्भम् । निरिति । हन्यात् । षडुद्याममिति षट्–उद्यामम् । शिक्यम् ।
भवति । षोढाविहित इति षोढा – विहितः । वै । **36 (50)**

**TS 5.6.9.2**

पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा
एष यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति
यदुखां चोलूखलं चोपदधाति ताभ्यामेव यजमानोऽमुष्मिन्

ँल्लोके ऽग्निं दुहे सँवथ्सरो वा एष यदग्निस्तस्य त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवीर् – [ ] 37

**TS 5.6.9.2 - Padam**

पुरुषः । आत्मा । च । शिरः । च । चत्वारि । अङ्गानि । आत्मन्न् । एव । एनम् । बिभर्ति । प्रजापतिरिति प्रजा – पतिः । वै । एषः । यत् । अग्निः । तस्य । उखा । च । उलूखलम् । च । स्तनौ । तौ । अस्य । प्रजा इति प्र – जाः । उपेति । जीवन्ति । यत् । उखाम् । च । उलूखलम् । च । उपदधातीत्युप – दधाति । ताभ्याम् । एव । यजमानः । अमुष्मिन्न् । लोके । अग्निम् । दुहे । सँवथ्सर इति सं – वथ्सरः । वै । एषः । यत् । अग्निः । तस्य । त्रेधाविहिता इति त्रेधा – विहिताः । इष्टकाः । प्राजापत्या इति प्राजा – पत्याः । वैष्णवीः । 37 (50)

**TS 5.6.9.3**

वैश्वकर्मणी–रहोरात्राण्येवास्य प्राजापत्या यदुख्यं बिभर्ति प्राजापत्या एव तदुप धत्ते यथ् समिध आदधाति वैष्णवा वै वनस्पतयो

वैष्णवीरेव तदुप धत्ते यदिष्टकाभि–रग्निं चिनोतीयं ँवै विश्वकर्मा
वैश्वकर्मणीरेव तदुप धत्ते तस्मा–दाहु–स्त्रिवृदग्निरिति तं ँवा एतं
ँयजमान एव चिन्वीत यदस्यान्य ( ) श्चिनुयाद्–यत् तं दक्षिणाभिर्न
राधयेदग्निमस्य वृञ्जीत यो ऽस्याग्निं चिनुयात् तं दक्षिणाभी
राधयेदग्निमेव तथ् स्पृणोति ॥ **38**

**TS 5.6.9.3 - Padam**

वैश्वकर्मणीरिति वैश्व – कर्मणीः । अहोरात्राणीत्यहः – रात्राणि ।
एव । अस्य । प्राजापत्या इति प्राजा – पत्याः । यत् । उख्यम् ।
बिभर्ति । प्राजापत्या इति प्राजा–पत्याः । एव । तत् । उपेति । धत्ते ।
यत् । समिध इति सं – इधः । आदधातीत्या – दधाति । वैष्णवाः ।
वै । वनस्पतयः । वैष्णवीः । एव । तत् । उपेति । धत्ते । यत् ।
इष्टकाभिः । अग्निम् । चिनोति । इयम् । वै । विश्वकर्मेति
विश्व – कर्मा । वैश्वकर्मणीरिति वैश्व – कर्मणीः । एव । तत् ।
उपेति । धत्ते । तस्मात् । आहुः । त्रिवृदिति त्रि – वृत् । अग्निः ।

इति । तम् । वै । एतम् । यजमानः । एव । चिन्वीत । यत् । अस्य । अन्यः ( ) । चिनुयात् । यत् । तम् । दक्षिणाभिः । न । राधयेत् । अग्निम् । अस्य । वृञ्जीत । यः । अस्य । अग्निम् । चिनुयात् । तम् । दक्षिणाभिः । राधयेत् । अग्निम् । एव । तत् । स्पृणोति ॥ **38 (70)**

*(षोढाविहितो वै – वैष्णवी – रन्यो – विꣳशतिश्च) (A9)*

**TS 5.6.10.1**

प्रजापति–रग्नि–मचिनुतर्तुभिः सँवथ्सरं ँवसन्तेनैवास्य पूर्वार्द्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं ँवर्.षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मद्ध्यं ब्रह्मणा वा अस्य तत् पूर्वार्द्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं ँविशोत्तरं पक्षमाशाया मद्ध्यं ँय एवं ँविद्वानग्निं चिनुत ऋतुभिरेवैनं चिनुते ऽथो एतदेव सर्वमव–[ ] **39**

**TS 5.6.10.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । अग्निम् । अचिनुत । ऋतुभिरित्यृतु – भिः । सँवथ्सरमिति सं – वथ्सरम् । वसन्तेन ।

एव । अस्य । पूर्वार्द्धमिति पूर्व – अर्द्धम् । अचिनुत । ग्रीष्मेण ।
दक्षिणम् । पक्षम् । वर्.षाभिः । पुच्छम् । शरदा ।
उत्तरमित्युत् – तरम् । पक्षम् । हेमन्तेन । मद्ध्यम् । ब्रह्मणा । वै ।
अस्य । तत् । पूर्वार्द्धमिति पूर्व – अर्द्धम् । अचिनुत । क्षत्रेण ।
दक्षिणम् । पक्षम् । पशुभिरिति पशु – भिः । पुच्छम् । विशा ।
उत्तरमित्युत् – तरम् । पक्षम् । आशया । मद्ध्यम् । यः । एवम् ।
विद्वान् । अग्निम् । चिनुते । ऋतुभिरित्यृतु – भिः । एव । एनम् ।
चिनुते । अथो इति । एतत् । एव । सर्वम् । अवेति । **39 (50)**

**TS 5.6.10.2**

रुन्धे शृण्वन्त्येनमग्निं चिक्यानमत्त्यन्न८ रोचत इयं ँवाव
प्रथमा चिति–रोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया
वया८सि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं ँयज्ञश्चतुर्थी
दक्षिणा पुरीषं ँयजमानः पञ्चमी प्रजा पुरीषं ँयत् त्रिचितीकं

चिन्वीत यज्ञं दक्षिणामात्मानं प्रजामन्तरियात् तस्मात्
पञ्चचितीकश्चेतव्य एतदेव सर्व॑ स्पृणोति यत् तिस्रश्चितय–[ ] 40

**TS 5.6.10.2 - Padam**

रुन्धे । शृण्वन्ति । एनम् । अग्निम् । चिक्यानम् । अत्ति । अन्नम् ।
रोचते । इयम् । वाव । प्रथमा । चितिः । ओषधयः । वनस्पतयः ।
पुरीषम् । अन्तरिक्षम् । द्वितीया । वया॑सि । पुरीषम् । असौ ।
तृतीया । नक्षत्राणि । पुरीषम् । यज्ञः । चतुर्थी । दक्षिणा । पुरीषम् ।
यजमानः । पञ्चमी । प्रजेति प्र – जा । पुरीषम् । यत् ।
त्रिचितीकमिति त्रि – चितीकम् । चिन्वीत । यज्ञम् । दक्षिणाम् ।
आत्मानम् । प्रजामिति प्र – जाम् । अन्तः । इयात् । तस्मात् ।
पञ्चचितीक इति पञ्च – चितीकः । चेतव्यः । एतत् । एव ।
सर्वम् । स्पृणोति । यत् । तिस्रः । चितयः । 40 (50)

**TS 5.6.10.3**

–स्त्रिवृद्ध्यग्निर्यद् द्वे द्विपाद्–यजमानः प्रतिष्ठित्यै पञ्च चितयो
भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति

पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्त॰ स्पृणोत्यथो दशाक्षरा विराडन्नं ँविराड् विराज्येवान्नाद्ये प्रति तिष्ठति सँवथ्सरो वै षष्ठी चितिर्.ऋतवः पुरीष॰ ( ) षट् चितयो भवन्ति षट् पुरीषाणि द्वादश सं पद्यन्ते द्वादश मासाः सँवथ्सरः सँवथ्सर एव प्रति तिष्ठति ॥ **41**

**TS 5.6.10.3 - Padam**

त्रिवृदिति त्रि – वृत् । हि । अग्निः । यत् । द्वे इति । द्विपादिति द्वि – पात् । यजमानः । प्रतिष्ठित्या इति प्रति – स्थित्यै । पञ्च । चितयः । भवन्ति । पाङ्क्तः । पुरुषः । आत्मानम् । एव । स्पृणोति । पञ्च । चितयः । भवन्ति । पञ्चभिरिति पञ्च – भिः । पुरीषैः । अभीति । ऊहति । दश । समिति । पद्यन्ते । दशाक्षर इति दश – अक्षरः । वै । पुरुषः । यावान् । एव । पुरुषः । तम् । स्पृणोति । अथो इति । दशाक्षरेति दश – अक्षरा । विराडिति वि – राट् । अन्नम् । विराडिति वि – राट् । विराजीति वि – राजि ।

एव । अन्नाद्य इत्यन्न – अद्ये । प्रतीति । तिष्ठति । सँवथ्सर इति सं – वथ्सरः । वै । षष्ठी । चितिः । ऋतवः । पुरीषम् ( ) । षट् । चितयः । भवन्ति । षट् । पुरीषाणि । द्वादश । समिति । पद्यन्ते । द्वादश । मासाः । सँवथ्सर इति सं – वथ्सरः । सँवथ्सर इति सं – वथ्सरे । एव । प्रतीति । तिष्ठति ॥ **41 (65)**

***(अव – चितयः – पुरीषं – पञ्चदश च) (A10)***

**TS 5.6.11.1**

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रः श्वेता वशाः सौर्यो मैत्राबार्.हस्पत्या धूम्रललामास्तूपराः ॥ **42**

**TS 5.6.11.1 - Padam**

रोहितः । धूम्ररोहित इति धूम्र – रोहितः । कर्कन्धुरोहित इति कर्कन्धु – रोहितः । ते । प्राजापत्या इति प्राजा – पत्याः । बभ्रुः । अरुणबभ्रुरित्यरुण – बभ्रुः । शुकबभ्रुरिति शुक – बभ्रुः ।

ते । रौद्राः । श्येतः । श्येताक्ष इति श्येत – अक्षः । श्येतग्रीव इति श्येत – ग्रीवः । ते । पितृदेवत्या इति पितृ – देवत्याः । तिस्रः । कृष्णाः । वशाः । वारुण्यः । तिस्रः । श्वेताः । वशाः । सौर्यः । मैत्राबार्.हस्पत्या इति मैत्रा – बार्.हस्पत्याः । धूम्रललामा इति धूम्र – ललामाः । तूपराः ॥ **42 (26)**

*(रोहितः–षड्विꣳशतिः) (A11)*

**TS 5.6.12.1**

पृश्ञि स्तिरश्चीनपृश्ञि–रूर्द्ध्वपृश्ञि स्ते मारुताः फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा मैत्रिय ऐन्द्राबार्.हस्पत्या अरुणललामा–स्तूपराः ॥ **43**

**TS 5.6.12.1 - Padam**

पृश्ञिः । तिरश्चीनपृश्ञिरिति तिरश्चीन – पृश्ञिः । ऊर्द्ध्वपृश्ञिरित्यूर्द्ध्व – पृश्ञिः । ते । मारुताः । फल्गूः । लोहितोर्णीति लोहित – ऊर्णीः । बलक्षी । ताः । सारस्वत्यः ।

पृषती । स्थूलपृषतीति स्थूल – पृषती । क्षुद्रपृषतीति क्षुद्र–पृषती ।
ताः । वैश्वदेव्य इति वैश्व – देव्यः । तिस्रः । श्यामाः । वशाः ।
पौष्णियः । तिस्रः । रोहिणीः । वशाः । मैत्रियः । ऐन्द्राबार्.हस्पत्या
इत्यैन्द्रा – बार्.हस्पत्याः । अरुणललामा इत्यरुण – ललामाः ।
तूपराः ॥ **43 (26)** *(पृश्निः – षड्विꣳशतिः) (A12)*

**TS 5.6.13.1**

शितिबाहु–रन्यतश्शितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः
शितिरन्ध्रो ऽन्यतश्शितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः
शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा
वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः
श्यामललामा–स्तूपराः ॥ **44**

**TS 5.6.13.1 - Padam**

शितिबाहुरिति शिति – बाहुः ।
अन्यतश्शितिबाहुरित्यन्यतः –शितिबाहुः ।
समन्तशितिबाहुरिति समन्त – शितिबाहुः । ते ।

ऐन्द्रवायवा इत्यैन्द्र – वायवाः । शितिरन्ध्र इति शिति – रन्ध्रः । अन्यतश्शितिरन्ध्र इत्यन्यतः – शितिरन्ध्रः । समन्तशितिरन्ध्र इति समन्त – शितिरन्ध्रः । ते । मैत्रावरुणा इति मैत्रा – वरुणाः । शुद्धवाल इति शुद्ध–वालः । सर्वशुद्धवाल इति सर्व–शुद्धवालः । मणिवाल इति मणि – वालः । ते । आश्विनाः । तिस्रः । शिल्पाः । वशाः । वैश्वदेव्य इति वैश्व – देव्यः । तिस्रः । श्येनीः । परमेष्ठिने । सोमापौष्णा इति सोमा – पौष्णाः । श्यामललामा इति श्याम – ललामाः । तूपराः ॥ **44 (25)**

*(शितिबाहुः पञ्चविꣳशतिः) (A13)*

**<u>TS 5.6.14.1</u>**

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत् त ऐन्द्राबार्.हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिद्ध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामा–स्तूपराः ॥ **45**

**TS 5.6.14.1 - Padam**

उन्नत इत्युत् – नतः । ऋषभः । वामनः । ते । ऐन्द्रावरुणा

इत्यैन्द्रा – वरुणाः । शितिककुदिति शिति – ककुत् । शितिपृष्ठ

इति शिति – पृष्ठः । शितिभसदिति शिति – भसत् । ते ।

ऐन्द्राबार्.हस्पत्या इत्यैन्द्रा – बार्.हस्पत्याः ।

शितिपादिति शिति – पात् । शित्योष्ठ इति शिति – ओष्ठः ।

शितिभ्रुरिति शिति – भ्रुः । ते । ऐन्द्रावैष्णवा इत्यैन्द्रा – वैष्णवाः ।

तिस्रः । सिद्ध्माः । वशाः । वैश्वकर्मण्य इति वैश्व–कर्मण्यः ।

तिस्रः । धात्रे । पृषोदरा इति पृष – उदराः ।

ऐन्द्रापौष्णा इत्यैन्द्रा – पौष्णाः ।

श्येतललामा इति श्येत – ललामाः । तूपराः ॥ **45 (25)**

*(उन्नतः पञ्चविꣳशतिः) (A14)*

**TS 5.6.15.1**

कर्णा स्त्रयो यामाः सौम्या स्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो

नकुला स्तिस्रो रोहिणी स्त्र्यव्य स्ता वसूनां तिस्रो ऽरुणा दित्यौह्य स्ता

रुद्राणाꣳ सोमैन्द्रा बभ्रुललामा–स्तूपराः ॥ **46**

**TS 5.6.15.1 - Padam**

कर्णाः । त्रयः । यामाः । सौम्याः । त्रयः । श्वितिङ्गाः । अग्नये ।

यविष्ठाय । त्रयः । नकुलाः । तिस्रः । रोहिणीः । त्र्यव्य इति

त्रि – अव्यः । ताः । वसूनाम् । तिस्रः । अरुणाः । दित्यौह्यः । ताः ।

रुद्राणाम् । सोमैन्द्रा इति सोम – ऐन्द्राः ।

बभ्रुललामा इति बभ्रु – ललामाः । तूपराः ॥ **46 (23)**

*(कर्णास्त्रयोविꣳशतिः) (A15)*

**TS 5.6.16.1**

शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णा स्त्रयो विष्णव उरुक्रमाय

लफ्सुदिन स्त्रयो विष्णव उरुगायाय पञ्चावी स्तिस्र आदित्यानां

त्रिवथ्सा स्तिस्रो ऽङ्गिरसामैन्द्रावैष्णवा गौरललामा–स्तूपराः ॥ **47**

**TS 5.6.16.1 - Padam**

शुण्ठाः । त्रयः । वैष्णवाः । अधीलोधकर्णा इत्यधीलोध – कर्णाः ।
त्रयः । विष्णवे । उरुक्रमायेत्युरु – क्रमाय । लफ्सुदिनः । त्रयः ।
विष्णवे । उरुगायायेत्युरु – गायाय । पञ्चावीरिति पञ्च – अवीः ।
तिस्रः । आदित्यानाम् । त्रिवथ्सा इति त्रि – वथ्साः । तिस्रः ।
अङ्गिरसाम् । ऐन्द्रावैष्णवा इत्यैन्द्रा – वैष्णवाः ।
गौरललामा इति गौर – ललामाः । तूपराः ॥ **47 (20)**

*(शुण्ठा – विꣳशतिः) (A16)*

**TS 5.6.17.1**

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्राया–धिराजाय त्रयः शितिककुद
इन्द्राय स्वराज्ञे त्रयः शितिभसद स्तिस्रस्तुर्यौह्यः साद्ध्यानां तिस्रः
पष्ठौह्यो विश्वेषां देवाना–माग्नेन्द्राः कृष्णललामा–स्तूपराः ॥ **48**

**TS 5.6.17.1 - Padam**

इन्द्राय । राज्ञे । त्रयः । शितिपृष्ठा इति शिति – पृष्ठाः ।
इन्द्राय । अधिराजायेत्यधि – राजाय । त्रयः ।

शितिककुद इति शिति – ककुदः । इन्द्राय । स्वराज्ञ इति स्व – राज्ञे । त्रयः । शितिभसद इति शिति – भसदः । तिस्रः । तुर्यौह्यः । साद्ध्यानाम् । तिस्रः । पष्ठौह्यः । विश्वेषाम् । देवानाम् । आग्नेन्द्राः । कृष्णललामा इति कृष्ण – ललामाः । तूपराः ॥ **48 (22)** *(इन्द्राय राज्ञे – द्वाविꣳशतिः) (A17)*

**TS 5.6.18.1**

अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयो ऽरुणैता स्तिस्रो धेनवो राकायै त्रयो ऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥ **49**

**TS 5.6.18.1 - Padam**

अदित्यै । त्रयः । रोहितैता इति रोहित – एताः । इन्द्राण्यै । त्रयः । कृष्णैता इति कृष्ण – एताः । कुह्वै । त्रयः । अरुणैता इत्यरुण – एताः । तिस्रः । धेनवः । राकायै । त्रयः । अनड्वाहः । सिनीवाल्यै । आग्नावैष्णवा इत्याग्ना – वैष्णवाः । रोहितललामा इति रोहित – ललामाः । तूपराः ॥ **49 (18)** *(अदित्या–अष्टादश) (A18)*

**TS 5.6.19.1**

सौम्या स्त्रयः पिशंगाः सोमाय राज्ञे त्रयः सारङ्गाः पार्जन्या

नभोरूपा स्तिस्रो ऽजा मल्.हा इन्द्राण्यै तिस्रो मेष्य आदित्या

द्यावापृथिव्या मालङ्गा–स्तूपराः ॥ **50**

**TS 5.6.19.1 - Padam**

सौम्याः । त्रयः । पिशङ्गाः । सोमाय । राज्ञे । त्रयः । सारङ्गाः ।

पार्जन्याः । नभोरूपा इति नभः–रूपाः । तिस्रः । अजाः ।

मल्.हाः । इन्द्राण्यै । तिस्रः । मेष्यः । आदित्याः ।

द्यावापृथिव्या इति द्यावा – पृथिव्याः । मालङ्गाः । तूपराः ॥ **50 (19)**

*(सौम्या – एकान्नविꣳशतिः) (A19)*

**TS 5.6.20.1**

वारुणा स्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा

वरुणाय रिशादसे त्रयो ऽरुणललामाः शिल्पा स्त्रयो वैश्वदेवा स्त्रयः

पृश्ञयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामा–स्तूपराः ॥ **51**

**TS 5.6.20.1 - Padam**

वारुणाः । त्रयः । कृष्णललामा इति कृष्ण – ललामाः । वरुणाय ।

राज्ञे । त्रयः । रोहितललामा इति रोहित – ललामाः । वरुणाय ।

रिशादस इति रिश – अदसे । त्रयः ।

अरुणललामा इत्यरुण – ललामाः । शिल्पाः । त्रयः ।

वैश्वदेवा इति वैश्व – देवाः । त्रयः । पृश्ञयः ।

सर्वदेवत्या इति सर्व – देवत्याः । ऐन्द्रासूरा इत्यैन्द्रा – सूराः ।

श्येतललामा इति श्येत – ललामाः । तूपराः ॥ **51 (20)**

*(वारुणा – विꣳशतिः) (A20)*

**TS 5.6.21.1**

सोमाय स्वराज्ञे ऽनोवाहा–वनड्वाहा–विन्द्राग्निभ्या–

मोजोदाभ्या–मुष्टारा–विन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाववी द्वे

धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू

भौमी वायव आरोहणवाहा–वनड्वाहौ वारुणी कृष्णे वशे अराड्यौ

दिव्या–वृषभौ परिमरौ ॥ **52**

**TS 5.6.21.1 - Padam**

सोमाय । स्वराज्ञ इति स्व – राज्ञे । अनोवाहावित्यनः – वाहौ ।

अनड्वाहौ । इन्द्राग्निभ्यामितीन्द्राग्नि – भ्याम् ।

ओजोदाभ्यामित्योजः–दाभ्याम् । उष्टारौ ।

इन्द्राग्निभ्यामितीन्द्राग्नि–भ्याम् । बलदाभ्यामिति बल – दाभ्याम् ।

सीरवाहाविति सीर – वाहौ । अवी इति । द्वे इति । धेनू इति ।

भौमी इति । दिग्भ्य इति दिक् – भ्यः । वडबे इति । द्वे इति ।

धेनू इति । भौमी इति । वैराजी इति । पुरुषी इति ।

द्वे इति । धेनू इति । भौमी इति ।

वायवे । आरोहणवाहावित्यारोहण – वाहौ । अनड्वाहौ ।

वारुणी इति । कृष्णे इति । वशे इति । अराड्यौ । दिव्यौ ।

ऋषभौ । परिमराविति परि – मरौ ॥ **52 (34)**

*(सोमाय स्वराज्ञे – चतुस्त्रिꣳशत्) (A21)*

**TS 5.6.22.1**

एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः
किकिदीविर्विदीगय स्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या
भवन्त्याग्नेय ऐन्द्राग्न आश्विन स्ते विशालयूप आ लभ्यन्ते ॥ **53**

**TS 5.6.22.1 - Padam**

एकादश । प्रातः । गव्याः । पशवः । एति । लभ्यन्ते । छगलः ।
कल्माषः । किकिदीविः । विदीगयः । ते । त्वाष्ट्राः । सौरीः । नव ।
श्वेताः । वशाः । अनूबन्ध्या इत्यनु – बन्ध्याः । भवन्ति । आग्नेयः ।
ऐन्द्राग्न इत्यैन्द्र – अग्नः । आश्विनः । ते ।
विशालयूप इति विशाल – यूपे । एति । लभ्यन्ते ॥ **53 (25)**

*(एकादश प्रातः – पञ्चविꣳशतिः) (A22)*

**TS 5.6.23.1**

पिशङ्गा स्त्रयो वासन्ताः सारङ्गा स्त्रयो ग्रैष्माः पृषन्त स्त्रयो
वार्.षिकाः पृश्ञय स्त्रयः शारदाः पृश्ञिसक्था स्त्रयो हैमन्तिका
अवलिप्ता स्त्रयः शैशिराः सँवथ्सराय निवक्षसः ॥ **54**

**TS 5.6.23.1 - Padam**

पिशङ्गाः । त्रयः । वासन्ताः । सारङ्गाः । त्रयः । ग्रैष्माः । पृषन्तः ।
त्रयः । वार्.षिकाः । पृश्ञयः । त्रयः । शारदाः । पृश्ञिसक्था इति
पृश्ञि – सक्थाः । त्रयः । हैमन्तिकाः । अवलिप्ता इत्यव–लिप्ताः ।
त्रयः । शैशिराः । सँवथ्सरायेति सं – वथ्सराय ।
निवक्षस इति नि – वक्षसः ॥ **54 (20)**

*(पिशङ्गा – विꣳशतिः) (A23)*

================

**Special Korvai for Anuvaakam 12 to 20**

रोहितः कृष्णा धूम्रललामाः – पृश्ञिः श्यामा अरुणललामाः –
शितिबाहुः शिल्पाः श्येनीः श्यामललामा – उन्नतः सिद्ध्मा धात्रे
पौष्णाः श्येतललामाः – कर्णा बभ्रुललामाः – शुण्ठा गौरललामा –
इन्द्राय कृष्णाललामा – अदित्यै रोहितललामः –
सौम्या मालङ्गा – वारुणाः सूराः श्येतललामा – दश ।

**Prasna Korvai with starting Padams of 1 to 23 Anuvaakams :-**

(हिरण्यवर्णा – अपां ग्रहान् – भूतेष्टकाः – सजूः – सँवथ्सरं –
प्रजापतिः स क्षुरपवि – रवग्नेर्वै दीक्षया – सुवर्गाय तं ँयन्न –
सूयते – प्रजापतिर्. ऋतुभी – रोहितः – पृश्ञिः – शितिबाहु –
रुन्नतः – कर्णाः – शुण्ठा – इन्द्राया– दित्यै – सौम्या – वारुणाः
– सोमायै – कादश – पिशङ्गा – स्त्रयोवि॑ँशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(हिरण्यवर्णा – भूतेष्टकाः – छन्दो यत् – कनीयाꣳसन्–

त्रिवृद्ध्यग्नि – वारुणा – श्चतुष्पञ्चाशत् )

**First and Last Padam of Sixth Prasnam of 5th Kandam**

(हिरण्यवर्णा – निवक्षसः)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

पञ्चमकाण्डे षष्ठः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 5 , Prasanam 6 (TS 5.6)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 222 |
| Anuvakam 2 | 6 | 297 |
| Anuvakam 3 | 4 | 198 |
| Anuvakam 4 | 5 | 232 |
| Anuvakam 5 | 3 | 154 |
| Anuvakam 6 | 4 | 210 |
| Anuvakam 7 | 3 | 178 |
| Anuvakam 8 | 6 | 307 |
| Anuvakam 9 | 3 | 170 |
| Anuvakam 10 | 3 | 165 |
| Anuvakam 11 | 1 | 26 |
| Anuvakam 12 | 1 | 26 |
| Anuvakam 13 | 1 | 25 |
| Anuvakam 14 | 1 | 25 |
| Anuvakam 15 | 1 | 23 |
| Anuvakam 16 | 1 | 20 |
| Anuvakam 17 | 1 | 22 |
| Anuvakam 18 | 1 | 18 |
| Anuvakam 19 | 1 | 19 |
| Anuvakam 20 | 1 | 20 |
| Anuvakam 21 | 1 | 34 |
| Anuvakam 22 | 1 | 25 |
| Anuvakam 23 | 1 | 20 |
| Total → | 54 | 2436 |

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**